ततः पात्रावशिष्टजलेन श्रीं श्रियै नमः लीं लीलायै नमः भूं भूम्यै नम इति मन्त्रोच्चारणेनार्घ्यादिकं प्रदाय ततः ॐ किरीटाय मुकुटाधिपतये नमः अ० । ॐ दक्षिणकुण्डलाय मकरात्मने नमः अ० । ॐ वामकुण्डलाय मकरात्मने नमः अ० । ॐ वैजयन्तीमालायै श्रीतुलस्यै नमः अ० । ॐ श्रीवत्साय श्रीनिवासाय नमः अ० । ॐ कौस्तुभाय रत्नाधिपतये नमः अ० । ॐ काञ्चीगुणोज्ज्वलाय दिव्यपीताम्बराय नमः अ० । ॐ सर्वेभ्योभगवद्दिव्यविभूषणेभ्यो नयः अ० । इति भगवद्भूषणानि अर्घ्यादिभिरभ्यर्चेत् ।

ततोऽर्घ्याद्यैकैकपात्रस्थजलेन क्रमशः ॐ शार्ङ्गायसबाणाय चापाधिपतये नमः अर्घ्यादिनिसमर्पयामि । ॐ सुदर्शनाय हेतिराजाय नमः अ० । ॐ पाञ्चजन्याय शङ्खाधिपतये नमः अ० । ॐ कौमोदक्यै गदाधिपतये नमः अ० । ॐ नन्दकाय खड्गाधिपतये नमः अ० । इति भगवतोदिव्यायुधानि अर्घ्यादिभिरभ्यर्चेत् ।

ततस्तथैव ॐ लं लक्ष्मणाय नमः अ० । ॐ भं भरताय नमः अ० । ॐ शं शत्रुघ्नाय नमः अ० । ॐ हुं हनुमते नमः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ० । ॐ सुं सुग्रीवाय नमः अ० । ॐ वं विभीषणाय नमः अ० । ॐ जं जाम्बवते नमः अ० । ॐ नं नलाय नमः अ०। ॐ नीं नीलाय नमः अ० । ॐ गं गवाक्षाय नमः अ० । ॐ गं गवाय नमः अ० । ॐ कं केसरिणे नमः अ० । ॐ सर्वेभ्योभगवत्परिजनपरिचरप्रभृतिभ्यो नमः अ० । इति-भगवत्परिजनानर्घ्यादिभिरभ्यर्चेत् ।

ततस्तथैव भगवतः पूर्वे ॐ ऋक्षराजाय नम० अ० । ॐ नीलाय नमः अ० । दक्षिणे ॐ सुग्रीवाय नमः अ० । ॐ नलाय नमः अ० । पश्चिमे ॐ शत्रुघ्नाय नमः अ० । ॐ अंगदाय नमः अ० । उत्तरे ॐ भरताय नमः अ० । ॐ विभीषणाय नमः अ०। भगवतोऽग्रे ॐ आञ्जनेयाय महाबलाय हुं हनुमते नमः अ०। भगतः पृष्ठे ॐ लक्ष्मणाय नमः अ० । ॐ सर्वेभ्यो भगवद्द्वारपालेभ्यो नमः अ० । इति भगवतो द्वारपालानर्घ्यादिभिरभ्यर्चेत् ।

ततस्तथैव ॐ विघ्नेशाय नमः अ० । ॐ वाण्यै नमः अ० । ॐ दुर्गायै नमः अ० । ॐ क्षेत्रपालाय नमः अ० । ॐ सूर्याय नमः अ०। ॐ चन्द्राय नमः अ०। ॐ नारायणाय नमः अ० । ॐ नारसिंहाय नमः अ०। ॐ वासुदेवाय नमः अ० । ॐ वाराहाय नमः अ० । इत्यङ्गदेवान् सम्पूज्य ॐ श्रीसीतायै नमः अ० । ॐ श्रीलक्ष्मणाय नमः अ० । ॐ श्रीहनुमते नमः अ० । ॐ श्रीभरताय नमः अ० । ॐ श्री शत्रुघ्नाय नमः अ० । ॐ श्रीविभीषणाय नमः अ० । ॐ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीसुग्रीवाय नमः अ० । ॐ श्रीअङ्गदाय नमः अ० । ॐ श्री जाम्बवते नमः अ० । ॐ श्रीप्रणवाय नमः अ० । इत्यङ्ग मन्त्रान् प्रपूजयेत् ।

ॐ सर्वेभ्यो भगवद्गणाधिपेभ्यो नमः अ० । ॐ सर्वेभ्यो भगवत्पार्षदेभ्यो नमः अ० । ॐ सर्वेभ्यो भगवत्परिजनपरिचरेभ्यो नमः अ० । ॐ नित्यै नमः अ० । ॐ मुक्त्यैनमः अ० । ॐ साङ्गसायुधसपरिवारसहीपीकाय दिव्यमङ्गलमूर्त्तये नमः अ० । अथेत्थं पूर्वोक्तैः सह भगवन्तंश्रीराममभ्यर्च्य अञ्जलिना पुष्पाण्यादायः

सुरासुरेन्द्रादिमनोमधुव्रतैर्निषेव्यमाणाङ्घ्रिसरोरुह प्रभो ।।
असंख्यकल्याणगुणामृतोदधे सुरेश रामाद्भूतवीर्यमापते ।१।
अपारसंसारमहार्णवप्लवं पदाम्बुजं ते प्रणतार्तिनाशनम् ।
निषेव्यमाणं सगणैः शिवादिभिर्गतोऽस्म्यहं ते शरणं शरण्यम् २
विकचपद्मदलायतलोचनां प्रणतकामदुघाङ्घ्रिसरोरुहाम् ।
अशरणःशरणांजनकात्मजे प्रतिदिन भवतीमनुचिन्तये ।।३।।
श्रीरामकैङ्कर्यपरायणम्मुहुर्मुहुश्च सीतेशनिदेशकारिणम् ।
तमेकवीरं शरदिन्दुकीर्तिं नमाम्यहं लक्ष्मणमप्रमेयम् ।।४।।
मणीन्दुगर्भं मुकुटाधिनाथं श्रीमत्किरीटं मणिकुण्डले च ।
श्रीकौस्तुभादीनि च दिव्यभूषणान्येतानि नित्यं प्रणमामि विष्णो
महाबलं वायुसुतं महामतिं प्रतप्तचामीकरचारुलोचनम् ।
श्रीरामपादाब्जनिविष्टमानसं द्विडन्तकं श्रीहनुमन्तमीडे ।।६।।

प्रत्यूहव्यूहभङ्गविदधदुरुबलश्शक्तिमान् सर्वकारी
भूरिश्रेयः प्रतापो मुनिवरनिकरैः स्तूयमानोविमानः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रक्षोदैत्यादिनाशीक्षुभितजलनिधिर्लोकजिल्लोकमान्यो
धन्योनोमङ्गलौघं सपदि सुकुरुतादाममशस्त्रास्त्रसङ्घः ॥७॥
सुग्रीवमुख्यान्परितोजनान्विभोः सद्वारपालान्नलनीलमुख्यान्
गणाधिपान्देववरस्यविष्णोर्नमाम्यहं नित्यमशेषपार्षदान् ।८।
हरिः ॐ यज्ञेन यज्ञमयजन्तदेवास्तानिधर्माणि प्रथमान्यासन्
तेह नाकम्महिमानः सचन्त यत्र पूर्वे साध्याःसन्ति देवाः ९
जगत्पते ? श्रीश ? जगन्निवास ? प्रभो जगत्कारण रामचन्द्र ?
नमो नमः कारुणिकाय तुभ्यं पादाब्जयुग्मे तव भक्तिरस्तु १०
भनोमिलिन्दस्तव पादपङ्कजे रमार्चिते संरमतां भवे भवे ।
यशः श्रुतौ ते मम कर्णयुग्मकं त्वद्भक्तसङ्गोऽतुसदा मम प्रभो
इत्यभिष्टूवन् पुष्पाञ्जलिं सर्वेश्वरश्रीरामचन्द्रपदारविन्दे
समर्प्य ।

उरःशिरोदृष्टिमनोवचःपदद्वयप्रराजत्करयुग्मजानुभिः ।
अङ्गैःक्षितौ तं प्रणमेदथाष्टभिर्दीर्घं तथैतैः कृतधीश्चदण्डवत्
इति साष्टाङ्गप्रणामंकुर्यात् ।

अथ महानैद्यसमये पात्राणि प्रक्षाल्य पूर्ववत्पूर्णकुम्भजलेन पात्राणि पूरयित्वा भोज्याशनार्थं पादुके प्रसार्यार्घ्यादिभिरभ्यर्च्य मधुपर्कं च प्रदाय भगवतः श्रीरामचन्द्रस्य पुरस्ताच्छुचिप्रदेशे यथाशक्तिसंपादितचतुर्विधभोज्यादीन्युपहृत्य—

दोषाकरं नीचमथाल्पशक्तिं चैतन्यहीनं त्वशुचिं त्वनर्हम् ।
त्वद्भृत्यकर्मण्यपराधभाजनम्परं दुरात्मानमितीत्थमेव ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुचिन्तयन्मामपि मत्समर्पितमशेषपापापहनामधेय ! ।
उपेक्षितुं त्वच्चरणावलम्बिनं न चार्हसि त्वं जगदीशराघव ! २
कौशल्याजनकात्मजावरगुणश्रीलक्ष्मणैरर्पितं
पंपायां शबरीसमर्पितमहोदिव्याद्भुतस्वादकम् ।
भारद्वाजसमर्पितं च सरसं क्षीरं व्रजे यत्स्वयं
तद्धैयङ्गवमर्जितं सहघृतं यद्यज्ञपत्न्यर्पितम् ॥३॥
अन्यैर्मुक्तजनैः कुचैलविदुराद्यैरर्पितं त्वत्प्रियम्
पथ्यं पाकविशेषसंयुतमथो दृष्टिप्रियं राघव ! ॥
रुच्यं दोषविवर्जितं सह यथाऽसेषः प्रभो ! भोक्तृभिः
स्वीकर्तुश्च तथार्हसि त्वमधुना भक्त्यार्पितं ते मया ॥४॥

हरिः ॐ नाभ्याऽआसीदन्तरिक्षगुंशीर्णो द्यौः समवर्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात्तथालोकांऽअकल्पयन् ।५।

इतिविज्ञाप्यार्घ्यजलेन प्रोक्ष्य श्रीमन्त्रराजेनाभिमन्त्र्य सुरभिमुद्रां प्रदर्श्य श्रीरामं जनकात्मजामनिलजमित्यादिगुरुपरम्परामनुसन्धाय निवेदयेत् ।

ततो जलपानहस्तशोधनगण्डूषपाद्याचमनादिभिरभ्यर्च्य-
शृणोमि सीतापतिचित्रसत्कथां वदामि सीतापतिकीर्तिमक्षयाम्
स्मरामि सीतापतिदिव्यविग्रहं वृणोमि सीतापतिभक्तिमुत्तमाम् ।
व्रजामि सीतापतिदिव्यमन्दिरं तथा च सीतापतिसत्प्रपन्नताम् ।
युनज्मि सीतापतिचिन्तने मनस्तनोमि सीतापतिदाससङ्गतिम्
अवैमि सीतापतिमञ्जुबन्धुतां तथा च सीतापतिदिष्टभोग्यताम्
ततश्च सीतापतिनित्यधामदां करोमि सीतापतिभक्तिमुत्तमाम्
करोमि सीतापतिपाददासतां नमामि सीतापतिपादपङ्कजम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पठामि सीतापतिकाव्यसंहतिं जपामि सीतापतिमन्त्रभूपतिम् ।
करोमि सीतापतिविग्रहार्चनं तथा च सीतापतिमूर्तिदर्शनम् ।
गुणाब्धिसीतापतिनामकीर्तनं परेशसीतापतिपादवन्दनम् ।५।
भजामि सीतापतिमेव केवलं रटामि सीतापतिमेव केवलम् ।
श्रयामि सीतापतिमेव केवलं प्रयामि सीतापतिमेव केवलम् ।६।

इत्याद्यनन्यतावेदनस्तोत्रपुरुषसूक्तादिकं पठन् प्रदक्षिणनमस्कारादिभिः संपूज्य भगवन्तं श्रीसीतासमेतं श्रीरामचन्द्रं पर्यङ्के निवेद्य–

पर्यङ्कासनमारुह्य सीतया सहितः प्रभो ! ।
निद्रां कुरुष्व भगवन् पार्षदैरभिरक्षितः ।।१।।

इति प्रार्थयन् निम्नाष्टकं गायन् शाययेत्–

माता गीत्वा स्वपुत्रं यदि शयनगतं संविधत्तेऽथ शेषिन् ?
शेषत्वात्सात्म्यतत्वं गतवत इह मे कोशलाधीशजायाः ।
वात्सल्यातुल्यपात्रं स्वपिहि गुणगणोदारगीतेन गीतो
देहे सौधेऽतिशुद्धे भजनकलनतः स्वान्तदोलाऽधिशायी ।।१।
कौशल्या कीर्तिधन्या यदुदरजनिमागाज्जगद्यत्तनुः स
श्रीरामो रावणास्याऽप्युपनवशिरसां कर्तितैकेषुणा द्राक् ।
जामाताऽन्वर्थनाम्नो नृपतिकुलमणेर्यो विदेहस्य कुर्यात्
स्वापं दोलां श्रितो हृन् मम दशरथसूर्भक्तिगङ्गाम्बुधौतम् ।।
नीलाभो नीलपद्मोद्भवकृतजगतीनाथ ! सीताधिनाथः
सद्भिर्भोग्योऽपि भोग्यं ननु निखिलमिदं यस्य लीलाधृताङ्गः
धन्वोन्मुक्तेषुणाऽब्जच्छदमिव सितवांस्ताटकोरः परेशो
भक्तिक्षीराब्धिशेषं सदपि मम मनो दोलिकां सोऽधिशेताम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राज्यं दत्त्वाऽनुजायाऽतिविपुलविलसच्छ्रीसमिद्धं निरीहो
वक्षस्वीवीरलक्ष्मी वसतिरनुपमोदारकीर्तिर्निरर्तिः ।
अव्राजील्लक्ष्मणेनाऽतिगहनविपिनं भक्तिभाजाऽनुजेना
ऽऽशेतां दोलां वरेण्यो मम हृदयकृतां सज्जनानां शरण्यः ॥
साकेतेशो विमातुर्वचनकरवरो ज्ञानिनामग्रभूमिः
पौरैः पित्रैस्तधान्यैरनुगमनकरैर्दण्डकां साकमाप्तः ।
शेषाणां तन्मुनिनां परमहितकृते दिव्यभैषज्यतुल्यो
दोलायां स्वापमेयाद्रघुकुलतिलकोमानसे मे स रामः ॥५॥
सुग्रीवायाऽधिराज्यं ददद्भिनवक्राऽब्दच्छविर्वालिकालः
पारावारेऽप्यपारे गिरिवरनिकरैर्बद्धसेतुर्विभुर्यः ।
प्राकारैः प्रावृतां तां दशमुखनगरी ध्वंसिता ध्यानगम्यो
दोलां चेतोऽधिशेतां मम सकलकलोध्वन्विनां ग्रामणीः सः ॥
लोकाक्ष्या सेचनाढ्यातुलबलवपुषा राजमानोविमानः
प्रोन्मीलन्नीलपङ्केरुहवदनघनश्यामधामाभिरामः ।
कोदण्डेनेषुणा चोल्लसितकरकजः श्रीविशालःसुमाल-
ङ्चित्ते स्वापं ममेयादहितविहतिकृद्दोलिकायां स रामः ॥७॥
वीराणामग्रणीर्यः सुरदनुजनृणां जन्मिनां वेतरेषां
कर्त्तापाताऽथहर्त्ता समविरुदयुतो हेयहीनोऽप्यहीनः ।
स्तुत्यो नम्यश्चगम्यश्चिदचिदुभयव्यापिवर्ष्मानिरुष्मा
रामः स्वापं म एयादसितमणितनुर्दोलिकायां स चित्ते ॥

ततो निवेदितनैवेद्यं मनसा चतुर्भागं परिकल्प्य श्रीहनुमदङ्गदसुग्रीवविभीषणादिभ्यो निवेद्यानन्तरं पूर्वाचार्यादिभ्यः स्वाचार्येभ्यश्च निवेद्य शेषं भागवतैः सह भुञ्जीत ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रामानन्देापदिष्टेयं श्रीरामार्चनपद्धतिः ।
मुमुक्षूणां मुदे भूयाच्छ्रीरामप्रीतिकारिणी ॥१॥
अर्चको यः समभ्यर्चेदास्थायेमामहर्दिवम् ।
प्रासाद्य सगणं रामं लभते गतिमुत्तमाम् ॥२॥
इत्यानन्दभाष्यकार जगद्गुरु श्रीरामानन्दाचार्य प्रणीत
श्रीवैष्णवमताब्जभास्कर परिशिष्ट श्रीरामार्चनपद्धतिः ।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५ अथाचिदर्थनिरूपणम् ५

अथ क्रमप्राप्तमचित्तत्त्वमभिधीयते–

अचिन्नाम ज्ञानविरहितं तत्त्वम् । तच्चावस्थान्तरापत्तिरूपविकाराश्ररूपमत एव द्रव्यम् । तद्द्विविधम् जडाजडभेदात । तत्र परप्रकाश्यं जडम् । तद्भिन्नमजडम् ।१।

सर्वेश्वर श्रीरामजी का उपभोगार्ह चित् तत्त्व जीवात्मा के निरूपणानन्तर क्रम प्राप्त अचित् तत्त्व प्रकृति तत्त्व का निरूपण किया जाता है । अचित् तत्त्व उसे कहते हैं जो ज्ञान रहित द्रव्य तत्व हो । वह अचित् तत्त्व अवस्थान्तरित होता है यानी कार्य कलापानुसार समय समय पर घटता बढता रहता है अर्थात् उत्पत्ति स्थिति वृद्धि विपरिणति अपचय एवं नाश रूप छ प्रकार के कार्य कलापों वाला तथा विकार का आश्रय वाला हैं यानी "स्वरूपे च स्वभावे च विकारः प्रकृतेः खलु" इस जगद्गुरु श्रीद्वारानन्दाचार्यजी प्रणीत परिणाम विमर्श के निर्देसानुसार स्वरूप एवं स्वभाव दोनो में विकार होने वाला तत्त्व है इसलिये यह अचित् तत्त्व द्रव्य कहलाता है । वह अचित् तत्त्व जड तथा अजड के भेद से दो प्रकार का है । जड एवं अजड में से जो पर प्रकाश्य दूसरे से प्रकाशित होता है वहा जड द्रव्य है एवं जो तद् भिन्न स्वयं प्रकाशित होता है वह अजड द्रव्य है जैसे दिव्य धाम श्रीसाकेत आदि ।।१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अजडं द्विविधं पराक् प्रत्यक् भेदात् । तत्र स्वयं प्रकाशमानत्वे सति परस्मा एव भासमानत्वं पराक्त्वम् । परागपि द्विविधम् शुद्धसत्वज्ञानभेदात् ॥२॥

शुद्धसत्त्वम्

शुद्धसत्त्वंनाम त्रिगुणभिन्नं शुद्धसत्त्वगुणाधिकरणमचिद् द्रव्यम् । तन्नित्यमजडमधः प्रदेशे परिच्छिन्नमूर्ध्वप्रदेशे चान्तरहितम् । "आदित्यवर्णं तमसः परस्तात्" (श्वे. उ०

पराक् एवं प्रत्यक् के भेद से अजड दो प्रकार का होता है । उन दोनों में से जो स्वयं अन्य साधन के बिना स्वयं प्रकाश मान होता हुआ पर को भी विभासित प्रकाशित करता है वह पराक् कहलाता है । शुद्धसत्व एवं ज्ञान के भेद से पराक् भी दो प्रकार का है ॥२॥

शुद्ध सत्व उसे कहते है जो सत्व रज एवं मत रूप तीन गुण वाली प्रकृति से भिन्न होकर भी गुण का अधिकरण आधार स्वरूप शुद्ध सत्त्व हो तथा वह अचिद् द्रव्य है । वह शुद्ध सत्व नित्य है तथा अजड है एवं अधः प्रदेश– एक पाद-विभूति में परिच्छिन्न सीमित है और ऊर्ध्व प्रदेश त्रिपाद विभूति में अन्त रहित अनन्त है । इस शुद्ध सत्व के होने में प्रमाण निम्न है –तमः शब्द से वाच्य प्रकृति मण्डल से पर परात्पर श्रीसाकेत लोक में स्थित आदित्य वर्ण निरतिशय उज्वलादि गुण विशिष्ट दिव्य मंगल विग्रह विशिष्ट सर्वतोधिक महत्व शाली सर्वेश्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३।८) "तद्विष्णोः परमं पदं सदापश्यन्ति सूरयः" (ऋ. १।२२।२०-शु.य. ६।५) इत्यादिश्रुतयस्तत्र प्रमाणभूताः । तदीश्वरसंकल्पान्नित्यमुक्तेश्वराणां भोग्यभोगोपकरणभोगस्थानरूपं भवति । नित्यविभूतिनित्यधामपरमधामपरमव्योमाक्षरधामश्रीसाकेतादिशब्दाः शुद्धसत्त्वपर्यायाः ॥३॥

॥ ज्ञानम् ॥

अर्थप्रकाशो ज्ञानम् । तच्च प्रभावद् द्रव्यगुणात्मकम श्रीरामजी को जानता हूं' सर्व व्यापक सर्वाधार भूत श्रीरामजी के उस परम पद श्रीसाकेत धाम को साधना में सलग्न सूरिवर्ग आविर्भूत गुणाष्टक वाले साधक यानी अपहतपाप्मा सर्वदोष रहित विजर जरारहित विमृत्यु मृत्युरहित विशोक दोषरहित विजिघत्स अशना दोषरहित अपिपास पिपासारहित सत्यकाम एवं सत्य संकल्प रूप आठ गुणों को प्राप्त किये साधक लोक सर्वदा देखते हैं इत्यादि श्रुतियां प्रमाणरूप से मौजुद हैं । वह शुद्ध सत्व ईश्वर के संकल्प से नित्यमुक्त जीव एवं ईश्वर के लिये भोग्य भोग का उपकरण तथा भोग का स्थान यों तीनो ही होता है । नित्य विभूति नित्यधाम परमधाम परमव्योम अक्षरधाम श्रीसाकेतधाम आदि शब्द शुद्ध सत्व शब्द के पर्यायवाची हैं यानी ये सभी शब्द श्रीरामधाम के बोधक हैं ॥३॥

अर्थ विषयों को प्रकाशित करने वाले को ज्ञान कहते हैं वह प्रभा के समान द्रव्यरूप एवं गुणरूप दोनो ही है तथा अजड विभु द्रव्य है । वह ज्ञान ईश्वर एवं नित्य जीवों में सर्वदा विभु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जडंविभुद्रव्यम् । तच्चेश्वरस्य नित्यानां च सदैवविभुः मुक्तानां बद्धावस्थायां तिरोहितं मुक्तौ विभु बद्धानां तु तिरोहितमेव ॥४॥

ज्ञानं हि नित्यं द्रव्यम् "न हि विज्ञातु र्विज्ञाते र्विपरि लोपो विद्यते" (बृ०४। ३।३०) इति श्रुतेः । "ज्ञानमुत्पन्नम्" "ज्ञानं नष्टम्" इत्यादिव्यवहारस्तु ज्ञानसम्बन्धिसंकोच-विकासावस्थाहेतुक एवेति ध्येयम् । ज्ञानं मतिः प्रज्ञा संवित् धिषणा धीः मनीषा शेमुषी बुद्धिरित्यादयः शब्दा ज्ञान-पर्यायाः ॥५॥

व्यापक असंकुचित रहता है मुक्त जीवों में प्रथम बद्ध अवस्था में तिरोहित आवृत रहता है पर मुक्त अवस्थ में विभु असंकु-चित हो जाता है परन्तु बद्ध जीवों का ज्ञान तो तिरोहित ही रहता है ॥४॥

ज्ञान नाश न होने वाला नित्य द्रव्य है क्योंकि बाह्य एवं आभ्यन्तर के सभी स्वरूपों को अवगत करने वाले विज्ञान रूप विशेष शक्ति को नाश रहित होने से सर्वतो भावसे लोप नाश नहीं होता है इस प्रकार से श्रुति में वर्णन है अतः ज्ञान नित्य सिद्ध होता है । ज्ञान उत्पन्न हुआ' ज्ञान नाश हुआ इत्यादि उत्पन्न एवं नाश सम्बन्धि अनित्य व्यवहार तो ज्ञान सम्बन्धि ज्ञानविषयक संकोच तथा विकास के अवस्था को लेकर के होता है ज्ञान के अनित्य होने से नहीं ज्ञान तो नित्य ही है ऐसा जाननां चाहिये । ज्ञान मति प्रज्ञा संवित् धिषणा धी मनोषा शेमुषी एवं बुद्धि आदि शब्द ज्ञान के पर्यायवाची शब्द हैं ऐसा जानना ।५।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परप्रकाश्यं जडमित्युक्तं प्राक् । जडं द्विविधं प्रकृतिकालभेदात् । तथा चोक्तं श्रौतसिद्धान्तविन्दुकार श्रीश्रुतानन्दाचार्यचरणैः—

"अचिन्नाम तत्त्वं द्विधाज्ञानशून्यं,
जडञ्चाजडं नैवमिथ्याकदाचित् ।
जडं मिश्रसत्वं तथा कालतत्त्वं,
मनीषाऽजडं शुद्धरूपं च सत्त्वम्" इति ।

पीछले अचित् तत्त्व के विभाग प्रसंग में अजड तथा जड दो विभाग कर जड का लक्षण पर प्रकाश्य कहा गया था वह पर प्रकाश्य जड तत्त्व भी दो प्रकार का होता है प्रकृति तथा काल के भेद से इस तत्त्व के विभाग को श्रौतसिद्धान्त विन्दु कार श्रीश्रुतानन्दाचार्यजी ने निम्न प्रकार से कहा है— जड एवं अजड के भेद से अचित् नाम का तत्त्व दो प्रकार का है एवं वह ज्ञान से शून्य होने पर भी कदापि मिथ्या नहीं है । जड का शुद्ध मिश्र एवं शून्य तीन प्रकार का विकास होता है मिश्र सत्व यानी प्रकृति से महतत्त्व उस से सात्विक राजस तथा तामस भेद से तीन प्रकार का अहंकार तथा सात्विक अहंकर से पांच ज्ञानेन्द्रिय पांच कर्मेन्द्रिय एवं उभयात्मक मन उत्पन्न होते हैं तामस अहंकार से शब्द स्पर्श रूप रस एवं गन्ध पांच तन्मात्राएं तथा पृथिवी अप तेज वायु एवं आकाश पांच महाभूत उत्पन्न होते हैं । राजस अहंकार सात्विक तथा तामस दोनों का ही सहायक होता है । शून्य सत्व से भूत भविष्य आदि काल उत्पन्न होता है । शुद्ध सत्व अजड के रूप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रमिश्रसत्वपदेनाविद्यामायाद्यपरपर्याया प्रकृतिरुक्ता ।६।

प्रकृतिः

प्रकृतिर्नाम सत्त्वरजस्तमोरूपगुणत्रयाश्ररूपं द्रव्यम् । तत्र सत्वं नाम ज्ञान सुखतदुभयसङ्गोत्पादको गुणः । रजो नाम रागतृष्णाकर्मसङ्गोत्पादको गुणः । तमोनामविपरीत ज्ञानानवधानालस्यनिद्रोत्पादकोगुणः ।।७।।

उक्तञ्च श्रीततत्त्वसमुच्चयकारैराचार्यसार्वभौमैर्भगवद्भिः श्रीराघवानन्दाचार्यैः—

में प्रसिद्ध है वही नित्य विभूति या पर धाम है तथा मनीषा ज्ञान आदि शब्द भी अजड शब्द से व्यवहृत होने हैं । इस श्लोक में आये मिश्र सत्व पद से अविद्या माया आदि पर्याय वाची शब्द वाली प्रकृति को कहा गया है ।।६।।

प्रकृति उसे कहते हैं जो सत्व गुण रजो गुण एवं तमोगुण नाम से प्रसिद्ध तीनो गुणों में आश्रित द्रव्य हो सात्विक राजस तथा तामस इन तीनों गुणों में से जो ज्ञान का उत्पादक या सुख का उत्पादक अथवा ज्ञान सुखात्मक दोनों का उत्पादक हो उसे सत्व गुण कहते हैं । तथा राग तृष्णा या राग तृष्णा रूप दोनों कर्म सम्बन्धी संगती के उत्पादक गुण को रजोगुण कहते हैं । एवं विपरीत उलटा ज्ञान असावधान आलस्य एवं निद्रा आदि के उत्पादक गुण को तमोगुण कहते हैं ।।७।।

तीन गुणों के चर्चा प्रसंग में आचार्य सार्वभौम जगद्गुरु श्रीराघवानन्दाचार्यजीने श्रौतत्तत्त्व समुच्चय नामक प्रवन्ध में कहा है

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"तत्र सत्वं निर्मलत्वात् प्रकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ? ॥
रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।
तन्निबध्नाति कौन्तेय ! कर्म सङ्गेन देहिनम् ॥
तमस्त्वज्ञानं विद्धि मोहनं सर्वदेहिनाम्" (गीता १४।६-८)

इतिभगवद्वचनप्रामाण्यात् सत्वं नाम ज्ञानस्य सुखस्य तदुभयसङ्गस्य च जनको गुणः । रजोनाम रागतृष्णा कर्मणां सङ्गानां जनकोगुणः । तमो नाम विपरीतज्ञानानवधानालस्य निद्राणां जनको गुणः" (श्रीततत्त्व समुच्चयः) इति ॥८॥

निष्पाप अर्जुन ! उन सत्वादि तीन गुणों में निर्मल एवं अनामय रोगादि से रहित सुखजनक एवं ज्ञानादि के प्रकाशक होने से सत्वगुण साधकों को सुख के संगों से एवं ज्ञान के संगों से बांधता है यानी सत्व गुण प्रसंग से साधक सुखी तथा ज्ञानी होता है । हे कौन्तेय ! तृष्णा के संग से समुद्भव रजो गुण को तुम रागात्मक कामना स्वरूप वाला जानो वह साधकों को कर्म संगति में बांध देता है । इसी प्रकार अज्ञान से जायमान तमो गुण को जानो जो सभी प्राणि वर्ग को मोहित कर देता है । इत्यादि भगवान के प्रामाणिक वचनों से यह बोध होता है कि ज्ञान का सुख का या ज्ञान एवं सुख दोनों के संग का उत्पादक जो होता है वह सत्व गुण है । राग तृष्णा एवं कर्म आदि संगों के जनक पैदा करने वाले गुण को रजो गुण कहते हैं । विपरीत उलटा ज्ञान असावधान आलस्य एवं निद्रा आदि के उत्पादक गुण को तमोगुण कहते हैं ॥८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रलये प्रकृतेस्त्रायोऽपि गुणाः साम्यमापन्ना एव भवन्ति । "तदैक्षत बहुस्याम्" इतीश्वरसङ्कल्पवशात् प्रकृतिर्गुणवैषम्यप्रयुक्तां कार्योन्मुखावस्थामवाप्याव्यक्तपद वाच्या भवति ॥९॥

॥ महत्तत्त्वम् ॥

अव्यक्तपदवाच्यायाः प्रकृतेर्यः प्रथमोविकारः स महान् । स च त्रिविधः । सात्विकराजसतामसभेदात् ।१०।

प्रलय काल में प्रकृति के सत्व रज एवं तम तीनों ही गुण साम्य अवस्था को प्राप्त कर जाते हैं अतः किसी प्रकार की प्रवृत्ति नहीं होती है । जब मैं एक हूं बहुत होजाऊ इस प्रकार से सृष्टि हेतु ईश्वर ने संकल्प किया तो प्रकृति अपने गुणों के विषमता जनित कार्योत्पादकता कार्यों को उत्पन्न करने की अवस्था को प्राप्त कर के अव्यक्त नाम वाली हो जाती है यानी प्रलय में क्षोभ रहित होने से तीनों गुणों के समान अवस्था प्राप्त कर शान्त रूप से स्थित प्रकृति सृष्टि हेतु ईश्वर के संकल्प से क्षोभिता होकर सृष्टि के लिये उद्यतहो जाती है उस समय उसका नाम अव्यक्त होता है जिसके द्वारा महतत्त्व आदि की सृष्टि सम्पन्न होती है ॥९॥

अव्यक्त पद से कथित अव्यक्त नाम वाली प्रकृति का सृष्टि क्रम में जो पहला विकार होता है वह महान् महत्तत्त्व कहलाता हैं तथा सात्विक राजस एवं तामस यानी सत्व गुण रजो गुण तथा तमो गुणों के भेद से महत्तत्त्व भी सात्विक राजस एवं तामस रूप से तीन प्रकार का होता है ॥१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अहङ्कारः ॥

महतः प्रथमो विकारोऽहङ्कारः । सोऽपि सात्विकादि भेदात् त्रिविधः । एते सात्विकराजसतामसाख्या अहङ्काराः क्रमाद् वैकारिकतैजसभूतशब्दैरप्यभिधीयन्ते ॥११॥

॥ एकादशेन्द्रियाणि ॥

राजसाहङ्कारसहकृतात् सात्विकाहङ्कारादेकादशेन्द्रियाणि जायन्ते तानि द्विविधानि । ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च ॥१२॥

ज्ञानप्रसरणेशक्तानीन्द्रियाणि ज्ञानेन्द्रियाणि । तानिषड् विधानि मनः श्रोत्रं त्वक्चक्षूरसनं घ्राणञ्चेति ।

महत्तत्त्व का पहला विकार अहंकार है । अहंकार भी कारण गुण के अनुरोध से तीनों गुणों से युक्त होता है अतः सात्विक अहंकार राजस अहंकार एवं तामस अहंकार के भेद से तीन प्रकार का होता है । ये सात्विक अहंकार राजस अहंकार तथा तामस अहंकार क्रमश वैकारिक तैजस तथा भूतनाम से भी कहे जाते हैं अर्थात् सात्विक अहंकार को वैकारिक राजस अहंकार को तैजस एवं तामस अहंकार को भूत शब्द से भी प्रसगं या प्रकरणादि में व्यवहार होता है ॥११॥

राजस अहंकार के सहायता से सात्विक अहंकार से ग्यारह इन्द्रियां उत्पन्न होती हैं वे ज्ञानेन्द्रिय एवं कर्मेन्द्रिय के भेद से दो प्रकार के होती हैं ॥१२॥

ज्ञान कराने में समर्थ इन्द्रिय गुणों को ज्ञानेन्द्रिय कहते हैं वे मन श्रोत्र त्वचा आंख जिह्वा एवं नाक के भेद से छ प्रकार के

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रस्मृत्यादिकरणमिन्द्रियं मनः । हृदयदेशवृत्तिः । शब्दमात्रग्रहणसमर्थमिन्द्रियं श्रोत्रम् । कर्णशष्कुलीवृत्तिः । सर्पाणां तु नेत्रगोलोकवृत्तिः । स्पर्शमात्रग्रहण समर्थमिन्द्रियं त्वक् । सर्वशरीरवृत्तिः । रूपमात्रग्रहणसमर्थमिन्द्रियं चक्षुः । नेत्र वृत्तिः । रसमात्रग्रहणसमर्थमिन्द्रियं रसनम् जिह्वाग्र वृत्तिः । गन्धमात्रग्रहणसमर्थमिन्द्रियं घ्राणम् । नासाग्र वृत्तिः ॥१३॥

उच्चारणाद्यन्यतमकर्मसमर्थानीन्द्रियाणि कर्मेन्द्रियाणि । तानि पञ्चविधानि वाक् पाणि पाद पायूपस्थभेदात् ।

हैं । उन छ प्रकार के ज्ञानेन्द्रियों में से स्मृति स्मरण आदि के साधन भूत इन्द्रिय को मन कहते हैं वह हृदय प्रदेश में रहता है । केवल शब्द के ही ग्रहण में समर्थ ईन्द्रिय को श्रोत्र कहते हैं वह मनुष्यादि में कान के साथ सम्युक्त आकाश में रहता है पर सर्प के नेत्र गोलक में रहता है । केवल स्पर्श मात्र के ग्रहण में समर्थ इन्द्रिय को त्वचा कहते हैं वह सर्व शरीर में रहता है । रूप मात्र के ग्रहण में समर्थ इन्द्रिय को चक्षु कहते हैं वह आंख में रहता है । केवल रस के ग्रहण में समर्थ इन्द्रिय को रसना कहते है वह जीभ के अग्रभाग में रहता है । गन्ध मात्र के ग्रहण में समर्थ इन्द्रिय को घ्राण कहते है वह नाक के अग्रभाग में रहता है ॥१३॥

उच्चारण बोलना कार्य करना चलना आदि कार्यों में समर्थ इन्द्रियों को कर्मेन्द्रिय कहते हैं वे वाक् पाणि पाद पायु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रोच्चारणकरणमिन्द्रियं वाक् । हृदयादिस्थानाष्टक वृत्तिः । शिल्पादिकरणमिन्द्रियं पाणिः । अङ्गुल्यादिवृत्तिः । सञ्चारकरणमिन्द्रियं पादः । चरणादिवृत्तिः । मलोत्सर्जन-करणमिन्द्रियं पायुः । गुदादिवृत्तिः । मैथुनकरणमिन्द्रिय मुपस्थः । मेहनादिवृत्तिः ॥१४॥

॥ तन्मात्रापञ्चकं भूतपञ्चकञ्च ॥

राजसाहङ्कारसहकृतात् तामसाहङ्काराच्छब्दतन्मात्र मुत्पद्यते । तन्मात्रं नाम भूतोपादानं द्रव्यम् । तत्

एवं उपस्थ के भेद से पांच प्रकार के हैं । उन पांच प्रकार के कर्मेन्द्रियों में उच्चारण कार्यों में साधन भूत इन्द्रिय को वाक् वाणी कहते हैं वह हृदय आदि आठ स्थानों पर रहती है । शिल्पी हाथों से विविध कार्य करने में समर्थ इन्द्रिय को पाणि कहते हैं वह अंगुली के अग्रभाग में रहता है । संचरण के साधन रूप इन्द्रिय को पाद कहते हैं वह चरणों में रहता है । मलत्याग करने के साधन रूप इन्द्रिय को पायु कहते हैं वह गुदा में रहता है । मैथुनादि के साधन रूप इन्द्रिय को उपस्थ कहते हैं वह मेहन में रहता है ॥१४॥

राजस अहंकार के सहायता से तामस अहंकार से शब्द तन्मात्रा उत्पन्न होती है । भूतों के पृथिवी अप् तेज वायु एवं आकाश ये पंच महाभूत हैं इन के उपादान जिनसे कोई वस्तु बने या उपन्न हो उसे उपादान कहते हैं विशिष्टाद्वैत वेदान्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चविधं शब्दस्पर्शरूपरसगन्धभेदात् । विशिष्टशब्दादि गुणाश्रयो भूतम् । तदपि पञ्चविधमाकाशवायुतेजोऽपृथिवीभेदात् ॥१५॥

तत्र तामसाहङ्काराव्यवहितोत्तरावस्थाविशिष्टं द्रव्यं शब्दतन्मात्रम् । तस्मादाकाशमुत्पद्यते । रूपरहितं विशिष्टशब्दाधिकरणं द्रव्यमाकाशम् । तच्च शब्द गुणकम् ॥१६॥

प्रक्रिया के अनुसार अविभक्त नाम एवं रूप वाले चित् तथा अचित् शरीर वाले पर ब्रह्म श्रीरामजी ही विभक्त नाम एवं रूप वाले चित् तथा अचित् शरीर वाले का कारण हैं अतः कारण एवं कार्य की एकरूपता होने से सभी नित्य हैं अनित्य या मिथ्या इस मत में कुछ भी नहीं है । तो भूतों के उपादान द्रव्य को तन्मात्रा कहते हैं यानी भूतों के उत्पत्ति से पूर्व सूक्ष्मरूपतया कारण स्वरूप में जो हो उसे तन्मात्रा कहते हैं अर्थात् भूतों के उत्पत्ति कारण का नाम तन्मात्रा है । वह पांच प्रकार का होता है शब्द तन्मात्रा स्पर्श तन्मात्रा रूपतन्मात्रा रस तन्मात्रा एवं गन्ध तन्मात्रा के भेद से । शब्द स्पर्श रूप रस एवं गन्ध रूप विशेष गुणों के आश्रय को भूत कहते हैं । वह भी पांच प्रकार का होता है आकाश वायु तेज जल तथा पृथिवी के भेद से ॥१५॥

पूर्वोक्त उन पांच तन्मात्राओं में से तामस अहंकार से अव्यवहित व्यवधान रहित उत्तर अवस्था में स्थित विशेष द्रव्य को शब्द तन्मात्रा कहते हैं उसी से आकाश उत्पन्न होता है । जो रूप से रहित तथा विशिष्ट शब्द का अधिकरण आधार हो ऐसे द्रव्य को आकाश कहते हैं । वह शब्द गुण वाला होता है ॥१६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आकाशाव्यवहितोत्तरावस्थाविशिष्टं द्रव्यं स्पर्शतन्मात्रम् तस्माद् वायुरुत्पद्यते । रूपरहितं विशिष्टस्पर्शवद् द्रव्यं वायुः । स च शब्दस्पर्शगुणकः । वायोः स्पर्शोऽनुष्णाशीतोऽस्तीति बोध्यम् । देहधारको वायुविशेषः प्राणः । स पञ्चविधः । प्राणापानव्यानोदानसमानभेदात् । तत्र प्राणो हृदयवृत्तिरपानोगुदवृत्तिर्व्यानः सर्वशरीरवृत्तिरुदानः कण्ठ वृत्तिः समानश्च नाभिवृत्तिरिति बोध्यम् ॥१७॥

शब्द गुण वाले आकाश से अव्यवहित दूसरा कोई व्यवधान रहित उत्तर अवस्था में होने वाले विशिष्ट द्रव्य का नाम स्पर्श तन्मात्रा है उस स्मर्शतन्मात्रा से वायु उत्पन्न होता है । रूप से रहित विशिष्ट स्पर्श वाले द्रव्य को वायु कहते है वह शब्द एवं स्पर्श दो गुण वाला होता है । वायु का स्पर्श अनुष्णाशीत—गरम एवं ठण्डी से रहित सम भाव वाला होता है गरम के संयोग से गरम तथा ठण्डे के संयोग से ठण्डा का अनुभव होता है पर वह स्वभावतः समशीतोष्ण है । देह को धारण करने वाले विशेष प्रकार के वायु यो प्राण कहते है वह प्राण अपान व्यान उदान तथा समान वायु इन नामों एवं भिन्न भिन्न क्रिया से पांच प्रकार का हो जाता है । उन पांच में से प्राण नामक वायु हृदय में रहता है । अपान गुदा प्रदेश में रहता है । व्यान वायु सवशरीर में रहता है । उदान कण्ठ प्रदेश में रहता है एवं समान वायु नाभि प्रदेश में रहता है ऐसा जानना चाहिये ॥१७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाय्यव्यवहितोत्तरावस्थाविशिष्टं द्रव्यं रूपतन्मात्रम् । तस्मात्तेजउत्पद्यते । उष्ण स्पर्शवद्द्रव्यं तेजः । तच्च शब्द स्पर्शरूपगुणकम् । तेजसोरूपम् भास्वरं शुक्लमिति बोध्यम् ॥१८॥

तेजोऽव्यवहितोत्तरावस्था विशिष्टं द्रव्यं रसतन्मात्रम् । तस्मादाप उत्पद्यन्ते । शीतस्पर्शवत्य आपः । शब्दस्पर्शरूप-रसा अपां गुणाः । अपां रूपमभास्वरं शुक्लं रसश्च मधुर इति बोध्यम् ॥१९॥

वायु से अव्यवहित उत्तर अवस्था में होने वाले विशिष्ट द्रव्य को रूप तन्मात्रा कहते हैं उससे तेज उत्पन्न होता है । गरम स्पर्श वाले द्रव्य को तेज कहते हैं या गरम स्पर्श तेज का स्वाभाविक धर्म है तो गरम स्पर्श वाले को तेज कहने हैं । वह शब्द स्पर्श तथा रूप ये तीन गुण वाला होता है । तेज का रूप भास्वर—चमकिला चमकदार शुक्ल होता है ऐसा जानना चाहिये ॥१८॥

तेज से व्यवधान रहित उत्तर अवस्था में होने वाले विशिष्ट द्रव्य को रसतन्मात्रा कहते हैं उस रस तन्मात्रा से आप—पानी उत्पन्न होता है । शीत ठण्डास्पर्श वाले द्रव्य को पानी कहते हैं या पानी का स्वाभाविक धर्म शीत स्पर्श है गरम उसका पर सम्पृक्त औपाधिक है तो शीत स्पर्श वाले को पानी कहते हैं । शब्द स्पर्श रूप एवं रस पानी के गुण हैं । पानी का रूप अभास्वर नहीं चमकने वाला शुक्ल है तथा मधुर रस है ऐसा जान ना चाहिये ॥१९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवव्यवहितोत्तरावस्था विशिष्टं द्रष्यं गन्धतन्मात्रम् । तस्मात् पृथिव्युत्पद्यते विशिष्टगन्धवद् द्रव्यं पृथिवी । सा च शब्दादिगुणपञ्चकशालिनी । पृथिव्यां स्पर्शोऽनुष्णाशीतो रूपं शुक्लरक्तकृष्णपीतेति चतुर्विधं रसो मधुराम्ललवणकटुक षायतिक्तभेदात् षड्विधोगन्धो सुरभ्यसुरभीतिद्विविधः । तत्र रूपमभास्वरशुक्लमिति बोध्यम् । पृथिव्या रूपरसगन्ध स्पर्शाः पाकनिमित्तकाः ॥२०॥

पानी से अव्यवहित उत्तर काल में होने वाला द्रव्य विशेष को गन्ध तन्मात्रा कहते हैं उससे पृथिवी उत्पन्न होती है । विशिष्ट गन्ध से युक्त द्रव्य को पृथिवी कहते हैं यानी गन्ध वाले द्रव्य को पृथिवी जानना वह शब्द स्पर्श रूप रस एवं गन्ध इन पांचों गुणों से युक्त है । पृथिवी में अनुष्णाशीत स्पर्श रहता है अर्थात पृथिवी का स्पर्श गरम भी नहीं तथा ठण्डा भी नहीं समभाव का होता है शीत एवं ऊष्ण स्पर्श परौयाधिक हैं यानी अग्नि आदि के संयोग से गरम तथा पानी के संयोग से ठण्डा का अनुभव होता है । पृथिवी में शुक्ल रक्त कृष्ण एवं पीत के भेद से चार प्रकार का रूप होता है । और मधुर आम्ल लवण कटु कषाय एवं तिक्त के भेद से छ प्रकार का रस होता है तथा सुरभी सुगन्ध एवं असुरभी दुर्गन्ध के भेद से दो प्रकार का गन्ध होता हैं । पृथिवी में अभास्वर शुक्ल रूप होता है । पृथिवी में स्थित रूप रस गन्ध एवं स्पर्श पाक से जायमान होते हैं स्वतः नहीं ॥२०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाय्यव्यवहितोत्तरावस्थाविशिष्टं द्रव्यं रूपतन्मात्रम् । तस्मात्तेजउत्पद्यते । उष्ण स्पर्शवद्द्रव्यं तेजः । तच्च शब्द स्पर्शरूपगुणकम् । तेजसोरूपम् भास्वरं शुक्लमिति बोध्यम् ॥१८॥

तेजोऽव्यवहितोत्तरावस्था विशिष्टं द्रव्यं रसतन्मात्रम् । तस्मादाप उत्पद्यन्ते । शीतस्पर्शवत्य आपः । शब्दस्पर्शरूप-रसा अपां गुणाः । अपां रूपमभास्वरं शुक्लं रसश्च मधुर इति बोध्यम् ॥१९॥

वायु से अव्यवहित उत्तर अवस्था में होने वाले विशिष्ट द्रव्य को रूप तन्मात्रा कहते हैं उससे तेज उत्पन्न होता है । गरम स्पर्श वाले द्रव्य को तेज कहते हैं या गरम स्पर्श तेज का स्वाभाविक धर्म है तो गरम स्पर्श वाले को तेज कहने हैं । वह शब्द स्पर्श तथा रूप ये तीन गुण वाला होता है । तेज का रूप भास्वर—चमकिला चमकदार शुक्ल होता है ऐसा जानना चाहिये ॥१८॥

तेज से व्यवधान रहित उत्तर अवस्था में होने वाले विशिष्ट द्रव्य को रसतन्मात्रा कहते हैं उस रस तन्मात्रा से आप—पानी उत्पन्न होता है । शीत ठण्डास्पर्श वाले द्रव्य को पानी कहते हैं या पानी का स्वाभाविक धर्म शीत स्पर्श है गरम उसका पर सम्पृक्त औपाधिक है तो शीत स्पर्श वाले को पानी कहते हैं । शब्द स्पर्श रूप एवं रस पानी के गुण हैं । पानी का रूप अभास्वर नहीं चमकने वाला शुक्ल है तथा मधुर रस है ऐसा जान ना चाहिये ॥१९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवव्यवहितोत्तरावस्था विशिष्टं द्रष्यं गन्धतन्मात्रम् । तस्मात् पृथिव्युत्पद्यते विशिष्टगन्धवद् द्रव्यं पृथिवी । सा च शब्दादिगुणपञ्चकशालिनी । पृथिव्यां स्पर्शोऽनुष्णाशीतो रूपं शुक्लरक्तकृष्णपीतेति चतुर्विधं रसो मधुराम्ललवणकटुक पायतिक्तभेदात् षड्विधोगन्धो सुरभ्यसुरभीतिद्विविधः । तत्र रूपमभास्वरशुक्लमिति बोध्यम् । पृथिव्या रूपरसगन्ध स्पर्शाः पाकनिमित्तकाः ॥२०॥

पानी से अव्यवहित उत्तर काल में होने वाला द्रव्य विशेष को गन्ध तन्मात्रा कहते हैं उससे पृथिवी उत्पन्न होती है । विशिष्ट गन्ध से युक्त द्रव्य को पृथिवी कहते हैं यानी गन्ध वाले द्रव्य को पृथिवी जानना वह शब्द स्पर्श रूप रस एवं गन्ध इन पांचों गुणों से युक्त है । पृथिवी में अनुष्णाशीत स्पर्श रहता है अर्थात पृथिवी का स्पर्श गरम भी नहीं तथा ठण्डा भी नहीं समभाव का होता है शीत एवं ऊष्ण स्पर्श परौयाधिक हैं यानी अग्नि आदि के संयोग से गरम तथा पानी के संयोग से ठण्डा का अनुभव होता है । पृथिवी में शुक्ल रक्त कृष्ण एवं पीत के भेद से चार प्रकार का रूप होता है । और मधुर आम्ल लवण कटु कषाय एवं तिक्त के भेद से छ प्रकार का रस होता है तथा सुरभी सुगन्ध एवं असुरभी दुर्गन्ध के भेद से दो प्रकार का गन्ध होता हैं । पृथिवी में अभास्वर शुक्ल रूप होता है । पृथिवी में स्थित रूप रस गन्ध एवं स्पर्श पाक से जायमान होते हैं स्वतः नहीं ॥२०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५ पञ्चीकरणम् ५

सर्वेश्वरोभगवान् श्रीरामोभूतसृष्टिं विधायैकैकस्य भूतस्य समानभागद्वयं कृत्वैकं विहायापरस्य समानभागच तुष्टयं विधायैकैकतदर्धातिरिक्तेषु भूतार्धेषु संयोजयति । एतदेव भूतानां पञ्चीकरणम् ॥२१॥

अत एवाकाशादिषु सर्वेषु भूतेषु शब्दादीनां सर्वेषां गुणानामुपलब्धिः । इत्थं सर्वभूतेषु सर्वभूतानां विद्यमानत्वेऽपि पृथिव्यादिव्यपदेशः स्वभागस्यभूयस्त्वादपरभागस्य

सृष्टि के प्रारंभ काल में सर्वेश्वर भगवान् श्रीरामचन्द्रजी पृथिवी अप तेज वायु एवं आकाश इन पांच भूतों की सृष्टि कर के एक एक पृथिवी आदि पांचों भूतों का समान समान रूपसे दो दो भाग कर के उनमें से एक एक भाग को छोडकर दूसरे भाग के समान रूप से चार चार भाग कर के उन पांचों भूतों के आधेभाग में पृथिवी आदि के चतुर्थभाग को मिला देते हैं इसी प्रक्रिया को भूतों की पञ्चीकरण प्रक्रिया कहते हैं ॥२१॥

इसीलिये पंचीकरण प्रक्रिया से पांचों भूतों का मिश्रण है अतः आकाश वायु तेज जल पृथिवी सभी पांचों भूतों में शब्द स्पर्श रूप सर एवं गन्ध सभी गुणों की उपलब्धि होती है । इस पंचीकरण प्रक्रियानुसार आकाशादि पांचों भूतों में पांचों के रहने पर भी एक एक भूत में पृथिवी जल आदि का व्यवहार पृथिवी आदि का भाग अधिक अन्य जलादि का भाग कम होने से होता है ऐसा जानना चाहिये । वेद छान्दोग्य उपनिषद्प्रभृति में त्रिवृत करण प्रक्रिया का उपदेश है वह पंचीकर एवं सप्तीकरण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

શ્રીસીતારામાભ્યાં નમઃ

જગદ્‌ગુરુ શ્રીરામાનન્દાચાર્ય શ્રીયોગિરાજજીના
ચતુર્થ પુણ્યતિથિના ઉપલક્ષ્યમાં

શ્રીમદ્‌ભાગવત પારાયણ

એવં

પ્રવચનજ્ઞાન યજ્ઞ

તથા

શ્રીરામમહાયજ્ઞનું આયોજન

દરરોજના યજમાનો

દિ૦૧૦।૮।૯૩	મંગલવાર	શ્રીવાડીલાલ હીરાલાલ પટેલ (ઝલક મેડિકલસ્ટોર્સ)
,, ૧૧।૮।૯૩	બુધવાર	શ્રીઈલાબેન જીતેન્દ્રભાઈપટેલ
,, ૧૨।૮।૯૩	ગુરુવાર	શ્રીઉષાબેન ચંદુભાઈ પટેળ
,, ૧૩।૮।૯૩	શુક્રવાર	શ્રીગિરીશભાઈવિશ્વરામઠક્કર
,, ૧૪।૮।૯૩	શનિવાર	શ્રીરેણુકાબેન રતિચન્દ્રશાસ્ત્રી
,, ૧૫।૮।૯૩	રવિવાર	ખત્રી ડાહ્યાલાલધરમાજી
,, ૧૬।૮।૯૩	સોમવાર	શ્રીસંદીપભચુભાઈ નિમ્બાક
,, ૧૭।૮।૯૩	મંગલવાર	શ્રીઈશ્વરભાઈ વજેરામ ભાઈ વારડે

તા. ક. રવિવાર તા૦ ૧૫।૮।૯૩ સાંજે ૬ વાગે નન્દ મહોત્સ સત્સંગમંડલની માતાઓ ઉજવશે.

૧ શ્રીરામમહાયજ્ઞ પ્રારમ્ભ તા૦૧૦–૮–૯૩ મંગલવારે ૮–૩૦

૨ યજ્ઞની પૂર્ણાહુતિ કુસોત્પાટિનીઅમાસનાં દિવસે સવારે ૯–૩૦ વાગ્યે

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

૩ દરરોજ યજ્ઞનો સમય ૮–૩૦ થી ૯–૩૦ વાગ્યે

૪ કથા પ્રારંભ શ્રાવણ વદ ૮ તા. ૧૦–૮–૯૩ મંગલવારે સવારે ૯–૩૦ વાગ્યે

૫ પ્રવચનનો સમય સવારે ૧૦ થી ૧૨–૦૦ સાંજે ૪ થી ૬–૩૦ વાગ્યે

૬ કથાની પૂર્ણાહુતિ શ્રાવણવદ અમાસ તા૦ ૧૭–૮–૯૩ મંગલવારે સાંજે ૬–૩૦ વાગ્યે

૭ યજ્ઞના આચાર્ય આચાર્યપીઠના ધર્માધિકારી શ્રીશરચ્ચન્દ્ર શાસ્ત્રી છે.

૮ જન્માષ્ટમી તા.૧૦–૮–૯૩ મંગલવારે છે. દર વર્ષ પ્રમાણે રાત્રિમાં ઉત્સવ ઉજવાશે

ψ આયોજક ψ

શ્રીકોસલેન્દ્રસત્સંગમંડળ

જગદ્‌ગુરુ શ્રીરામાનન્દાચાર્યપીઠ ચોક

આચાર્યપીઠ

સરખેજરોડ અહમદાબાદ–૩૮૦૦૦૭

સમસ્ત જનતાને સહર્ષ પધારી તન મન ધન થી મહદ્ રૂપથવા આમંત્રણ છે.

કથાસ્થલ :–જગદ્‌ગુરુશ્રીરામાનન્દાચાર્યપીઠ–મકાવન

શ્રીકોસલેન્દ્રમઠ–શ્રીરામજીમન્દિર સરખેજરોડ

પાલડી અહમદાબાદ–૭

તા. ક. ઠિ૦ ૧૮–૮–૯૩ થી ૧૬–૯–૯૩ સુધી પુરુષોત્તમમાસના ઉપલક્ષ્યમાં આચાર્યશ્રીનું પ્રવચન થશે સમય સાયં ૬ થી ૭

શ્રીરામાનન્દાચાર્યપીઠશ્રીકોશમઠકે ધર્મપ્રચારવિભાગસેધર્મપ્રચારાર્થપ્રકાશિત

ψ મુદ્રક–શ્રીઆનન્દભાષ્યમુદ્રણાલય ψ

આચાર્યપીઠ

શ્રીકોસલેન્દ્રમઠ પો. પાલડી, અહમદાબાદ–૩૮૦૦૦૭

પ્રે. સં. પ્રતિ શ્રી.....

(NEPAL)

૨૯૭ પુસ્તકાલય વાલ્મીકિ અધ્યયન સંસ્થાન કાઠમાણ્ડૂ નેપાલ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu